(778) "तॄ प्लवनतरणयोः" (I-भ्वादिः-969. सक. सेट्. पर.)

प्लवनम्=मज्जनम्, तरणम्=लङ्घनम्। 'अभिभवे च' इति कविकल्पद्रुमे।

[1]तारकः-रिका, [2]तारका, तारकः-रिका, [3]तितरिषकः-तितरीषकः-तितीर्षकः-र्षिका, [4]तेतिरकः-रिका;

तरिता-तरीता-त्री, तारयिता-त्री, तितरिषिता-तितरीषिता-तितीर्षिता-त्री, तेतिरिता-त्री;

[5]तरन्-[A]समुत्तरन्-न्ती, तारयन्-न्ती, तितरिषन्-[B]तितरीषन्-तितीर्षन्-न्ती;

तरिष्यन्-तरीष्यन्-न्ती-ती, तारयिष्यन्-न्ती-ती, तितरिषिष्यन्-तितरीषिष्यन्-तितीर्षिष्यन्-न्ती-ती; —

[6]व्यतितरमाणः, तारयमाणः, तारयिष्यमाणः, — तेतीर्यमाणः, तेतिरिष्यमाणः;

[7]तीः-तिरौ-तिरः; — — —

---

1. ण्वुलि, 'इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेन' (वा. 7-1-102) इति वृद्धिः। 'उरण् रपरः' (1-1-51) इति रपरः सन् वृद्धिर्भवति। एवं घञादिष्वपि बोध्यम्।
2. 'तारका ज्योतिषि' (वा. 7-3-45) इति वचनात् ज्योतिषि वाच्ये, 'प्रत्ययस्थात्—' (7-3-44) इति इत्वं न भवति। अन्यत्र इत्वे तारिका=दासी।
3. धातोः ऋदन्तत्वेन 'इट् सनि वा' (7-2-41) इतीड्विकल्पः। इट्पक्षे, 'वृतो वा' (7-2-38) इतीटो दीर्घविकल्पः। इडभावपक्षे, 'हलन्ताच्च' (1-2-10) इति सनः कित्त्वे, 'ऋत इद्धातोः' (7-1-100) इति इत्वे, 'हलि च' (8-2-77) इति दीर्घे च तितीर्षकः इति रूपम्। एवं सन्नन्ते सर्वत्र रूपत्रयं बोध्यम्।
4. 'ऋत इद् धातोः' (7-1-100) इति इत्वम्। रपरत्वम्। द्वित्वम्। अभ्यासे, 'गुणो यङ्लुकोः' (7-4-82) इति गुणः। 'यस्य हलः' (6-4-49) इति यकारलोपः। एवं यङन्ते सर्वत्र ज्ञेयम्। धातुरूपप्रकाशिकायां तु 'न धातुलोप—' (1-1-4) इति सूत्रस्थोद्योतकारपक्षमवलम्ब्य तेतीरकः-रिका इत्यादीनि यङन्ते दीर्घघटितानि रूपाणि प्रदर्शितानि।
5. शतरि, 'कर्तरि शप्' (3-1-68) इति शपि, शतुः सार्वधातुकत्वेन ङिद्वद्भावात् धातोरित्वे प्राप्ते, 'इत्वोत्वाभ्यां गुणवृद्धी विप्रतिषेधेन' (वा. 7-1-102) इति गुणे रूपम्।
6. 'कर्तरि कर्मव्यतीहारे' (1-3-14) इति शानचि, णत्वम्।
7. क्विपि, इत्वे रपरत्वे, 'र्वोरुपधाया दीर्घ इकः' (8-2-76) इति दीर्घे विसर्गः।

A. 'समुत्तरन्तावव्यथ्यौ नदान् भियोद्धयसन्निभान्।
सिध्यतारामिव ख्यातां शबरीमापतुर्वने॥' भ. का. 6.60.

B. 'अध्यास्त यं नक्रकुलं स्थवीयो द्विपोऽप्यमङ्क्त्वा न यमुत्ततार।
नभःस्पृगूर्मिस्तितरीषतोऽस्य हरेर्दधस्यैकपदीमदात् सः॥' वा. वि. 3. 38.